**DE-001-001533** Seat No. ________

**B. A. (Sem. V) (CBCS) Examination**

**March - 2022**

**Sanskrit : Paper-15**

*(संस्कृत भाषा एवं साहित्य)*

*(Old Course)*

**Faculty Code : 001**

**Subject Code : 001533**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

૧ (અ) નીચેનામાંથી કોઈ પણ **એક** ગદ્યખંડનો અનુવાદ કરો : ૮

1 (A) Translate any **one** of the following passages : 8

(१) न परिचयं रक्षति । नाभिजनमीक्षते । न रूपमालोकयते । न कुलक्रममनुवर्तते । न शीलं पश्यति । न वैदग्ध्यं गणयति । न श्रुतमाकर्णयति । न धर्ममनुरुध्यते । न सत्यमवबुध्यते । न त्यागमाद्रियते । न विशेषज्ञतां विचारयति । नाचारं पालयति । न सत्यमवबुध्यते न लक्षणं प्रमाणी करोति गन्धर्वनगरलेखेव पश्यत एव नश्यति ।

(२) यथा यथा चेयं दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति । तथा हीयं संवर्धनवारिधारा तृष्णाविषवल्कीनां व्याधिगीतिन्द्रियमृगाणां परामर्श धूमलेखा सच्यरित चित्राणां विभ्रमशय्या मोहदीर्घनिद्राणां निवासजीर्णवलभी धनमदपिशाचिकानां तिमिरोद्गूतिः शास्त्रदृष्टिनां पुरः पताका सर्वाविनयाम् ।

(બ) નીચેનામાંથી કોઈ પણ **બે** સંદર્ભ સહિત સમજાવો : ૬

(B) Explain any two of the following with reference to the context : 6

(१) अमृतसहोदरापि कटुकविपाका ।

(२) पुरुषोत्तमरतापि खलजन प्रिया ।

(३) सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम् ।

(४) विरला हि तेषामुपदेष्टारः ।

| | | |
|---|---|---|
| ૨ | નીચેનો પરિચ્છેદ વાંચી તેની નીચે આપેલા પ્રશ્નોના ઉત્તર સંસ્કૃતમાં લખો. | ૧૪ |
| **2** | Read the following passage and write answers in Sanskrit to the questions bellow it : | **14** |

(१) आसीन्मिथिलायां हरिसिंहदेवो नाम राजा । तस्य गणेश्वरो नाम मन्त्री बभूव । तस्य च नानाविधां सुबुद्धितां श्रुत्वा देवगिरे रामदेवो राजा परमसाश्चर्यश्चिन्तयामास । कथं मर्त्यलोकवासिनोऽपि, बृहस्पतेरिव मनीषा श्रुयते । भवतु निरूपयामि तावत। तदन्तरं स राजा हरिसिंहदेवेन राज्ञा समं मैत्रीमाचरत् । तदन्तरमुभयदिगुपचारेण सौहार्दे समुत्पन्ने स राजा रामदेवो हरिसिंहदेवलिखित द्वारा ययाचे यन्मह्यं द्वौ पुरुषो प्रेषयितव्यो, एकः सुधीर्द्वितीयो मुर्खश्चेति, तदालोक्य लेखनं पठन् सा राजा चिन्तयामास यन्मित्र वचनपरिहार्यम् । कं सुधियं कै च मुर्खं प्रेषयिष्यामिति चिन्ताव्याकुलितं राजानं दृष्ट्वा मन्त्रिराज उवाच – देव ! किमिति चिन्ता कृताऽस्ति । राजोवाच । मित्र नियोगानिर्वाहः परमलज्जा स्थानम् । ततस्तत्र को वा सुधी को वा मूर्खः प्रेषयितव्य इति चिन्तयामि । मन्त्रीराज उवाच न कश्चित् प्रेषयितव्यः राजोवाचः आः शान्तं पापम् । मित्रप्रार्थनायाः भङ्गो जायते । एवमुक्ते राजनि मन्त्रिराजो ब्रूते । मित्राभ्यार्थनायाः सिद्धिरेव भवति । यतो रामदेवो महाराजस्तस्य देवगिरिराज्ये किं वस्तु दुर्लभम् । कति पण्डिताः कति मूर्खा वा न सन्ति । तदितः प्रहितेन मूर्खेण पण्डितेन वा किं तस्य प्रयोजनम् । ततस्तर्कयामि स राजा परमविदग्धः कुतुकी च । तथाविधपुरुषबद्धय प्रार्थनाव्याजेन भवतो मन्त्रिणं मां स परीक्षते यदहं मूर्खं पण्डितं च परिचिनोमि न वेति । राजोवाच । तत्किं विधातुमुचितम् ।

(१) गणेश्वरः कस्य मन्त्री आसीत् ?

(२) रामदेवः लिखित द्वारा किं ययाचे ?

(३) यदा मन्त्री चिन्ताकारणम् अपृच्छत् तदा राजा हरिसिंहः किं अकथयत् ?

(४) हरिसिंहस्य चिन्ता कारणं श्रुत्वा मन्त्री कं उपायं अदर्शयत् ?

(५) मन्त्रिणा दर्शितस्य उपायस्य अनुष्ठानेन किं भवति ?

(६) मन्त्रिणः मतेन रामदेवः कीदृशः ?

(७) रामदेवः किं परीक्षते ?

(२) अस्ति भागीरथी तीरे गृध्रकूटनाम्नि पर्वते महान पर्कटीवृक्षः तस्य कोटरे दैवदुर्विपाकात् गालितनखनयनो जरद्गव नामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किंचित्किंचिदुध्धृत्य ददति । तना सौ जीवति । शावकानां रक्षणं करोति । अथ कदाचिद् दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षयितुं तत्रागतः ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयतैः कोलाहलः कृतः तत्छ्रुत्वा जरद्गवेनोक्तम् कोऽयमायाति । दीर्घकर्णो गृध्रमवलोक्यसभयमाह – हा हतोऽस्मि । यतः –

तावद् भयस्य भेतव्यं यावद् भयमनागतम् ।
आगतं तु भयंवीक्ष्य नरः कुर्याद् यथोचितम् ॥

अधुनास्य सन्निधाने पलायितुमक्षमः । तद्यथा भवितव्यं तद्भवतु । तावद् विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोक्योपसृत्या ब्रवीत्–आर्य त्वामभिवन्दो गृध्रोऽवदत्कस्त्वम् । सोऽवदत् – मार्जारोऽहम् । गृध्रो ब्रूते दूरमपसर । नो चेत् हन्तव्योऽसिमया । मार्जारोऽवदत् – श्रुयतां तावदस्मद्वचनम् । ततो यद्यहं बध्यस्तदाहन्तव्यः ।

(१) किदृशः गृध्रः भागीरथीतीरे प्रतिवसति ? किं नामधेयं गृध्रः ?
(२) गृध्रस्य जीवनाय वृक्षवासिनः पक्षिणः किं ददति ?
(३) पक्षिशावकान् भक्षयितु तत्र कः आगतः ?
(४) भयस्य कदा भेतव्यं ?
(५) गृध्रः मार्जारं किं कथयति ?
(६) मार्जारं आयान्तं दृष्ट्वा पक्षिशावकैः किं कृतम् ?
(७) किं नामधेयं मार्जारः ?

૩ નીચે આપેલા પત્રના વિષયને અનુલક્ષીને સંસ્કૃતમાં પત્ર લખો : (કોઈપણ **એક**) **૧૪**
**3** Write a letter in Sanskrit on any **one** of the following : **14**

(१) वक्तृत्वस्पर्धायां श्लोकगानस्पर्धायाञ्च प्रथम क्रमाङ्कः प्राप्तवान् पुत्रः स्वपितरं प्रति पत्रं लिखति ।

**અથવા / OR**

(१) छात्रः स्वअग्रजस्य विवाहप्रसङ्गे स्वगृहे गच्छति । पुनरागमने विलम्बः भविष्यति । अतः अवकाशविलम्बनार्थं स्वस्य अध्यापकाय पत्रं लिखति ।

**૪** નીચેનામાંથી કોઈ પણ **એક** વિષય પર સંસ્કૃતમાં નિબંધ લખો : **૧૪**
**4** Write essay in Sanskrit on any **one** of the following : **14**

(१) जननी जन्मभूमिश्च स्वर्गादपिगरीयसी ।
(२) विद्याधनं सर्व धन प्रधानम् ।
(३) धनमहिमा ।
(४) गीतासुगीता कर्तव्या ।

**૫** નીચેનામાંથી કોઈ પણ **બે** પર ટૂંકનોંધ લખો : **૧૪**
**5** Write short notes on the following : (any **two**) **14**

(१) शुकनास उपदेशे गुरुविचाराः ।
(२) बाणभट्टस्य जीवनम् ।
(३) बाणोच्छिष्टं जगत्सर्वम् ।
(४) લક્ષ્મી વિશે બાણના વિચારો
(4) The thoughts of बाण about लक्ष्मी.